# Arjunakritam Shri Krishnavishvarupadarshanam 2

# અર્જુનકૃતં શ્રીકૃષ્ણવિશ્વરૂપદર્શનમ્ ૨

## Document Information

Text title : Arjunakritam Shri Krishnavishvarupadarshanam 2

File name : arjunakRRitaMshrIkRRiShNavishvarUpadarshanam2.itx

Category : vishhnu, vishnu, krishna, mahAbhArata

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | bhIShmaparva | adhyAya 33/36-46|| bhagavadgItA adhyAya 11

Latest update : November 2, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 2, 2025

*sanskritdocuments.org*

# Arjunakritam Shri Krishnavishvarupadarshanam 2

# અર્જુનકૃતં શ્રીકૃષ્ણવિશ્વરૂપદર્શનમ્ ૨

અર્જુન ઉવાચ ।
સ્થાને હૃષીકેશ તવ પ્રકીર્ત્યા જગત્પ્રહૃષ્યત્યનુરજ્યતે ચ ।
રક્ષાંસિ ભીતાનિ દિશો દ્રવન્તિ સર્વે નમસ્યન્તિ ચ સિદ્ધસઙ્ઘાઃ ॥ ૩૬॥

કસ્માચ્ચ તે ન નમેરન્મહાત્મન્ ગરીયસે બ્રહ્મણોઽપ્યાદિકર્ત્રે ।
અનન્ત દેવેશ જગન્નિવાસ ત્વમક્ષરં સદસત્તત્પરં યત્ ॥ ૩૭॥

ત્વમાદિદેવઃ પુરુષઃ પુરાણસ્ત્વમસ્ય વિશ્વસ્ય પરં નિધાનમ્ ।
વેત્તાસિ વેદ્યં ચ પરં ચ ધામ ત્વયા તતં વિશ્વમનન્તરૂપ ॥ ૩૮॥

વાયુર્યમોઽગ્નિર્વરુણઃ શશાઙ્કઃ પ્રજાપતિસ્ત્વં પ્રપિતામહશ્ચ ।
નમો નમસ્તેઽસ્તુ સહસ્રકૃત્વઃ પુનશ્ચ ભૂયોઽપિ નમો નમસ્તે ॥ ૩૯॥

નમઃ પુરસ્તાદથ પૃષ્ઠતસ્તે નમોઽસ્તુ તે સર્વત એવ સર્વ ।
અનન્તવીર્યામિતવિક્રમસ્ત્વં સર્વં સમાપ્નોષિ તતોઽસિ સર્વઃ ॥ ૪૦॥

સખેતિ મત્વા પ્રસભં યદુક્તં હે કૃષ્ણ હે યાદવ હે સખેતિ ।
અજાનતા મહિમાનં તવેદં મયા પ્રમાદાત્પ્રણયેન વાપિ ॥ ૪૧॥

યચ્ચાવહાસાર્થમસત્કૃતોઽસિ વિહારશય્યાસનભોજનેષુ ।
એકોઽથવાપ્યચ્યુત તત્સમક્ષં તત્ક્ષામયે ત્વામહમપ્રમેયમ્ ॥ ૪૨॥

પિતાસિ લોકસ્ય ચરાચરસ્ય ત્વમસ્ય પૂજ્યશ્ચ ગુરુર્ગરીયાન્ ।
ન ત્વત્સમોઽસ્ત્યભ્યધિકઃ કુતોઽન્યો લોકત્રયેઽપ્યપ્રતિમપ્રભાવ ॥ ૪૩॥

તસ્માત્પ્રણમ્ય પ્રણિધાય કાયં પ્રસાદયે ત્વામહમીશમીડ્યમ્ ।
પિતેવ પુત્રસ્ય સખેવ સખ્યુઃ પ્રિયઃ પ્રિયાયાર્હસિ દેવ સોઢુમ્ ॥ ૪૪॥

અદૃષ્ટપૂર્વં હૃષિતોઽસ્મિ દૃષ્ટ્વા ભયેન ચ પ્રવ્યથિતં મનો મે ।
તદેવ મે દર્શય દેવ રૂપં પ્રસીદ દેવેશ જગન્નિવાસ ॥ ૪૫॥

કિરીટિનં ગદિનં ચક્રહસ્ત મિચ્છામિ ત્વાં દ્રષ્ટુમહં તથૈવ ।

તેનૈવ રૂપેણ ચતુર્ભુજેન સહસ્રબાહો ભવ વિશ્વમૂર્તે ॥ ૪૬॥

ઇતિ મહાભારતે ભીષ્મપર્વણિ ૩૩ અધ્યાયાન્તર્ગતં
અર્જુનકૃતં શ્રીકૃષ્ણવિશ્વરૂપદર્શનં ૨ સમ્પૂર્ણમ્ ।

મહાભારત । ભીષ્મપર્વ । અધ્યાય ૩૩/૩૬-૪૬॥

mahAbhArata . bhIShmaparva . adhyAya 33/36-46..

This is part of Bhagavadgita Ch.11

Proofread by PSA Easwaran

---

*Arjunakritam Shri Krishnavishvarupadarshanam 2*
pdf was typeset on November 2, 2025

Please send corrections to *sanskrit@cheerful.com*